M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 200

Title: Punyaham.

Puṇyāham	Title
Kamalākara Bhatta	Author
	Editor
Sam. 1790	Year, Vols.
	Publisher
200	Remarks

200

ZOO

॥श्रीगणेशाय नमः॥ ततः कर्ता कुलपुंजेषु गौरी पद्मा शची मेधा सावित्री विज
या जया॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः। धृतिः पुष्टिस्तथा तुष्टिरात्मनः
कुलदेवता॥ गणेशेनाधिका ह्येता वृद्धौ पूज्यास्तु षोडश॥ ब्राह्मी माहेश्वरी चैव कौ
मारी वैष्णवी तथा। वाराही च तथेंद्राणी चामुंडा सप्त मातरः। इति गणेशादि सर्वा
गौर्यादि षोडश। ब्राह्म्यादि सप्त च नामभिर्मातृरावाह्य कुड्ये घृतेन पंच सप्त वा।
धाराः कृत्वा। वसुधारायै नम इत्यावाह्य षोडशोपचारैः संपूज्य नांदीश्राद्धं कुर्या
त्। यथा। सर्वं सव्येन देवतीर्थेन यवैश्च पित्र्येपि। मात्रादित्रय पित्रादित्रय माता
महादित्रय संबंधि नांदीमुख सत्यवसु संज्ञक विश्वेदेव स्थाने नव ब्राह्मणाः
कर्तव्याः प्राङ्मुखान्नवं तौ प्राप्ता वा वेति यो विप्रो कुशान्दर्वा दैवे निधाय मातृपिता
महीनाममुकदेवी नांदीसंज्ञानामित्याचार्यचूडामणिः। नांदीमुखीनां स्थाने
इत्यादिना यो पितृपितामहप्रपितामहानां नांदीमुखानां स्थाने इत्यादिना यो

मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां नांदीमुखानां स्थाने इत्या
दिनाद्यौ। कोकिलमतानुसारिणां तु मातृमातामहा इति मातामहेस्वह मातुः
श्राद्धं। तदा पार्वणद्वयमेव। तत्र नामगोत्रे। मूलं निर्णयसिंधौ ज्ञेयं। ततः सत्य
वसुसंज्ञका विश्वेदेवाः इदं वः पाद्यं पादावनेजनं एष वोऽर्घः। एवं मात्रादौ एवं
मात्रादौ अर्घस्थाने संकल्पसिद्धिरस्तु। विश्वेदेवा एष वो गंधः। एवं मात्रा
दौ। एवं इमानि पुष्पाणि धूपदीपाच्छादनं एतेभ्यः गंधपुष्पधूपदी
पाच्छादनानां ताः सर्वे उपचाराः संपूर्णाः सन्तु। ततो ऽर्धचंद्रमंडलानुसारेण
कृत्वा पात्रेषु आमान्नं सोपस्करं आममूल्यं तं यथाशक्ति देमवा संप्रद
दे। नमः। एवं मातृपितामही प्रपितामही नांदीमुख्यः इदं वः युग्मेत्यादि पि
तृपितामहप्रपितामहाः नांदीमुखाः इदं वः युग्मेत्यादि। मातामहाः प्रमाता
महावृद्धप्रमातामहाः सपत्नीका नांदीमुखाः इदं वः इत्यादि। अत्र पिंडाः कृताः

२

पिंडप्रदेवे दिकं कृत्वा सव्यांग्या लेखास्तिस्रः कृत्वा दर्भानास्तीर्य मातर्नांदीमुखी अ
वनेनिक्ष्वेति जलं दत्वा एवं पितामही प्रपितामही। एवं मवंतः नांदीमुखेत्यादि
। ततः सक्तुना गुडेन वा दधिबदरयवमिश्रान् पिंडान् कृत्वा एतत्ते मातर्नांदी
मुखी एष ते पिंडः इदमन्नं वा स्वाहा नमः इत्येकं पिंडं दत्वा परंरस्यां द्वितीयं। ए
वमेकैकस्य दौ दौ दत्वा पुनः प्रत्यवनेनिक्ष्वेति प्रत्यवनेजनं प्राग्वद्दत्वा स्यांजना
जने वा मासि च दत्वा शेषमवघ्राय पात्रस्य जलं परिषिच्य शिवा आपः संति
त्यादि। कृते तत्र नांदीश्राद्धकर्मणः सांगतासिद्ध्यर्थं द्राक्षामलकयवातत्त्रिःक
यद्रव्यं वा दक्षिणां तुभ्यं संप्रददे। स्वाहा नम इति प्रत्येकं दत्वाऽनेन नांदीश्राद्धे
न नांदीमुखदेवताः प्रियंतां। माता पितामही चैव तथैव प्रपितामही। पिता
पितामहश्चैव तथैव प्रपितामहः। मातामहस्तत्पिता च प्रमातामहकादयः
एते भवंतु मे प्रीताः। ताः प्रयच्छंतु च मंगलमिति संप्रार्थ्य पिंडान् विसृजेत्॥ ।।

इति शूद्रकमलाकरपद्धतौ वृद्धिश्राद्धं॥ ॥एतदंतं सर्वत्र संस्कारेषु च समानं।
यत्र तु शूद्रयजमानादौ ऋत्विग्वरणं तत्राचाराच्छरावे। आपः क्षीरं कुशाग्राणि
दधि दूर्वाक्षतास्तथा। सर्षपाः कुंकुमं चेति त्वर्घोष्टांगः प्रकीर्तितः इत्यर्घं गम
र्घं कृत्वा। स्वागतं वा द्विजश्रेष्ठा मदनुग्रहकारकाः। इदमर्घमिदं पाद्यं सवद्भि
:प्रतिगृह्यतामिति पादार्घमाचमनं कृत्वाचार्यब्रह्मत्विग्वरणं कृत्वा ब्राह्मणा
न् प्रार्थयेत्॥ ॥ब्राह्मणाः संतु मे शास्ताः पापात् पांतु समाहिताः। देवानां चैव
दातारः पातारः सर्वदेहिनां।१ जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः। देवानां
च पितॄणां च तृप्त्यर्थं याजकाः कृताः।२ येषां देहे स्थिता वेदाः पावयंति जगत्त्रयं। रक्षं
तु सततं मां तु जपयज्ञे व्यवस्थिताः।३ ब्राह्मणा जंगमं तीर्थं त्रिषु लोकेषु विश्रुतं
। येषां वाक्योदकेनैव शुद्ध्यंति मलिना जनाः।४ पावनाः सर्ववर्णानां ब्राह्मणा
ब्रह्मरूपिणः। सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः।५ श्रोत्रियाः सत्यवा

दश्च वेदाध्ययनरताः सदा। यथा क्ष्मामृतसिंचिका रुद्धियांति नरद्रुमाः। अंगी
कुर्वंतु कर्मैतत् कल्पद्रुमसमाः शिवाः।६ मम यज्ञे जपे ह्यस्याः संतु मे नियमान्विताः।
७ सत्कुपालोचना श्रयशोक्त नियमे युक्ता मंत्रार्थे स्थिरबुद्धयः। यज्ञपालोचना
सर्वां कुरुयो हृद्धिमाप्नुयुः।८ मम यज्ञे जपे ह्यस्याः संतु मे नियमान्विताः। अक्रोध
नाः शौचपराः सततं ब्रह्मचारिणः।९ देवध्यानरता नित्यं प्रसन्नमनसस्तथा।
अदुष्टभाषिणः संतु मा संतु परनिंदकाः।१० ममापि नियमा ह्येते भवंतु भवता
मपि॥११॥ ॥ततो दो सर्वकर्मांगत्वात् पुण्याहवाचनमाचारानुसारेणोच्य
ते। व्यासः। संपूज्य गंधमाल्याद्यैर्ब्राह्मणान् स्वस्ति वाचयेत्। काम्यकर्मणि मां
गल्ये संग्रामाद्भुतदर्शने। यमः। सोंकारं ब्राह्मणे। कुर्यान्निरोंकारं महीपतौ।१ उ
पांशु च तथा चैव नृपस्वस्ति शूद्रे प्रकीर्तयेत्॥ ॥यथा। हे हेरंब त्वमेह्येहि अस्मिन्
स्थाने अंबिकात्मज। ऋद्धिसिद्धियुत ब्रह्मसर्वलोकपितः पितः।१ नागास्य नाग

ष्टकृत्पुत्र गणनायक चातुर्भुज। भूषितः स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः।१। आ
वाहयामि सत्वार्थं सिध्यर्थं मम क्रतोः। इहागत्य गृहाण त्वं पूजां रक्षस्व मे क्रतुं।२।
इत्यावाह्य षोडशोपचारैः संपूज्य पात्रे सफलमर्घमादाय। रक्ष रक्ष गणाध्यक्ष
रक्ष त्रैलोक्यरक्षक। भक्तानामभयं कर्त्ता त्राता भव भवार्णवात्। द्वैमातुर कृ
पासिंधो षाण्मातुराग्रज प्रभो। वरदस्त्वं वरं देहि वांछितार्थद।३। अनेन फल ३।६
दानेन फलदो भव मे प्रभो। इत्यर्घं दत्वा वक्रतुंड महाकाये ति प्रार्थयेत्। यज्ञा।
विघ्नेश्वराय वरदाय सुरप्रियाय लंबोदराय सकलाय जगद्धिताय। नागानना
य श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते। भक्तार्त्तिनाशन
कराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय। विद्याधराय विकटाय वाम
नाय भक्तप्रसन्नवरदाय नमो नमस्ते।४। नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः।
नमस्ते रुद्ररूपाय करिरूपाय ते नमः इति प्रार्थना। ततः स्वाग्रे धान्यराशिद्वये कल

शौ संस्थाप्य तत्र गंधदूर्वा पंचपल्लव फल हेम पंचरत्नादि क्षिप्त्वा धान्यपूर्णपात्र
द्वयं न्यस्य। तत्र। पाशहस्तं वरुणमर्णसांपतिमीश्वरं। आवाहयामि यज्ञेस्मिन् पूजा
मे प्रतिगृह्यतां इति वरुणमावाह्य संपूज्य। कलशस्य मुखे विष्णुरित्यादिः संप्रार्थ्य
मातृदेवो भव। पितृदेवो भव। आचार्यदेवो· अतिथिदेवो· आशिषः प्रार्थयंते।
एताः सत्याशिषः संतु। अवनिकृतजानुमंडलः कमलमुकुलसदृशामं
जलिं शिरस्याधाय दक्षिणेन पाणिना सुवर्णकलशं धारयित्वा दीर्घानागा
नद्यो गिरयस्त्रीणि विष्णुपदानि च। तेनायुःप्रमाणेन पुण्याहं दीर्घमायुरस्तु।
शिवा आपः संतु। सौमनस्यमस्तु। अक्षतं चारिष्टं चास्तु। गंधाः पांतु सौमंगल्यं चास्तु
। अक्षताः पांतु आयुष्यमस्तु। पुष्पाणि पांतु सौश्रियमस्तु। तांबूलानि पांतु ऐश्वर्यमस्तु
। दक्षिणाः पांतु बहुदेयं चास्तु। इति विप्रहस्ते दत्वा। यं कृत्वा सर्ववेदयज्ञक्रियाक
रणकर्मारंभाः शुभाः शोभनाः प्रवर्त्तंते तमहं नत्वा भवद्भिरनुज्ञातः पुण्यं पुण्याहं

वाचयिष्ये वाच्यतामिति तैरुक्ते। मा विघ्नं मा च मे पापं मा संतु परिपंथिनः। सौम्या
भवंतु सुखिनः सर्वे लोकाः सुखावहा इति कर्त्ता वदेत्। विप्रास्तथास्त्विति ब्रूयुः। क
रोतु स्वस्ति ते ब्रह्मा स्वस्ति चापि द्विजातयः। सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्व
दा। ययातिर्नहुषश्चैव धुंधुमारो भगीरथः। तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वंतु नित्य
शः। स्वस्ति तेस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च। स्वस्त्यपादकेभ्यश्च सर्वेभ्यः स्वस्ति ते
सदा। स्वाहा स्वधा शची चैव स्वस्ति कुर्वंतु ते सदा। लक्ष्मीररुंधती चैव कुरुतां स्व
स्ति ते नय। असितो देवलश्चैव विश्वामित्रस्तथांगिराः। वसिष्ठः कश्यपश्चैव स्व
स्ति कुर्वंतु ते सदा। धाता विधाता लोकेशो दिशश्च सदिगीश्वराः। स्वस्ति ते प्र
यच्छंतु कार्तिकेयश्च षण्मुखः। विवस्वान् भगवान् स्वस्ति करोतु तव सर्वशः। दिग्ग
जाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः। अधस्ताद्धरणीं योसौ नागो धारयते सदा। शे
षश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु। वदेद् इति वदेयुः। ततः कर्त्ता। ब्राह्मणाः सन्तः

समाधीयतां। समाहितमनसः स्मः इतीरिते। प्रसीदंतु भवंतः। प्रसन्नाः स्मः इत्युक्ते।
कुंभाज्जलं पातयन् वदेत्। शांतिरस्तु। पुष्टिस्तुष्टिर्वृद्धिः अविघ्नम् आयुष्यं शिवं
कर्म। कर्मसमृद्धिः। पुत्रसमृद्धिः। धनधान्यसमृ. इष्टसंपदस्तु। अनिष्टनिरसनं य
त्पापं तत्प्रतिहतमस्तु। यच्छ्रेयस्तदस्तु। उत्तरे कर्मण्यविघ्नमस्तु। उत्तरोत्तरमह
रहरभिवृद्धिरस्तु उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यंतां। तिथिकरणमुहू
र्तनक्षत्रसंपदस्तु। तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां। दुर्गा
पांचाल्यौ. अग्निपुरोगा विश्वेदेवाः प्री. इंद्रपुरोगा मरुद्गणाः प्री. ब्रह्मपुरोगाः सर्वे
वेदाः। वसिष्ठपुरोगा ऋषिगणाः अरुंधतीपुरोगा एकपत्न्यः। ब्रह्म च ब्राह्मणाश्च.
श्रीसरस्वत्यौ. श्रद्धामेधे. भगवती कात्यायिनी प्रीयतां। भग. माहेश्वरी. पुष्टिक
री. भग. तुष्टि. भग. वृद्धि. भग. विघ्नविनायकौ प्रीयेतां। भगवान् स्वामी महासेनः
सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः। सर्वग्रामदेवताः। सर्वाः कुलदेव।

ता॰ सर्वा इष्टदेवता॰। कलशस्थजलं पातयित्वा। शाम्यंतु घोराणि॰ शाम्यंतु पापानि।
शाम्यंत्वीतयः। शुभानि वर्धंतां। शिवा आपः संतु। शिवा ऋतवः॰ शिवा॰ अग्नयः। शि
वा ओषधयः। शिवा वनस्पतयः॰ शिवा अतिथयः। अहोरात्रे शिवे स्यातां। शुक्रां
गारकबुधबृहस्पतिशनैश्चरराहुकेतुसंहिताः सोमसहिता आदित्यपुरोगाः सर्वे ग्र
हाः प्रीयंतां। भगवान्नारायणः प्री॰ स्वामी महासेनः। पुण्याहकालान् वाचयिष्ये॰
वाच्यतां। ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारकं। वेदवृक्षोद्भवं नित्यं तत्पुण्याहं
ब्रुवंतु नः। दीयंते यत्र दानानि सम्यंते च द्विजातयः। दृश्यते यत्र मांगल्यं तत्पुण्या
हं सदास्तु मे। मम गृहे स्य कर्मणः पुण्याहं सदास्तु मे। मम गृहे स्य कर्मणः पुण्याहं
भवंतो ब्रुवंतु। त्रिः स्वस्ति पुण्याहमिति त्रिर्विप्राः। ततः। स्वस्ति यात्वविनाशाख्या पु
ण्यकल्याणवृद्धिदा। विनायकप्रिया नित्यं तां स्वस्तिं नो ब्रुवंतु नः। मम गृहे स्वस्ति भवं
तो ब्रुवंतु। आयुष्मते स्वस्तीति विप्राः। सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता

संपूर्णा चैव चंद्रे या तां ऋद्धिं नो ब्रुवंतु नः। ऋध्यतामिति ते त्रिः। पृथिव्यामुद्धृतायां
तु यत्कल्याणं पुरा कृतं। ऋषिभिः सिद्धगंधर्वैस्तत्कल्याणं ब्रुवंतु नः। कल्याणमि
ति त्रिर्विप्राः। ततः। क्षीरोदधिसमुद्भूता मथ्यमाने महोदधौ। विष्णोश्चैव प्रिया
नित्यं तां श्रियं नो ब्रुवंतु नः। श्रीरस्त्विति भवंतो ब्रुवंतु श्रीरस्तु नैऋके। वर्षशतं संपूर्ण
मस्तु शिवमस्तु वंशाभिवृद्धिरस्तु। प्रजापतिः प्रीयतां॥
ततो विप्राः। सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः। वासुदेवो जगन्नाथस्तथा
संकर्षणो विभुः। प्रद्युम्नश्चानिरुद्धश्च भवंतु जयाय ते। आखंडलोग्निर्भगवान्
यमो वै निर्ऋतिस्तथा। वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणा सहिताः
सर्वे दिक्पालाः पांतु वः सदा। कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः। बुद्धि
र्लज्जा वपुः शांतिः कांतिस्तुष्टिश्च मातरः। एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः

धाद्यादित्यस्कंदमातेमोक्षुधोजीवसितार्कजाः।ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च त
र्पिताः।५देवदानवगंधर्वायक्षराक्षसपन्नगाः।ऋषयोमनवोगावोदेवमातरएव
च।६देवपत्न्योध्रुवानागादैत्याश्चाप्सरसांगणाः।अस्त्राणिसर्वशास्त्राणिराजानोवा
हनानिच।७औषधानिचरत्नानिकालस्यावयवाश्चये।सरितःसागराःशैलास्तीर्थानि
जलदानदाः।८एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये।इत्याद्यैःपौराणैर्मंत्रैरभिषिंचे
त्।ततःपत्नीवामे।ततःकरोतुस्वस्तिनेवयेत्याद्यैःसर्वौकैर्यजमानस्यनीराजनंनित
कुर्यान्नीर्वादस्यएवंसर्वत्र॥ ॥इतिश्रीकमलाकरभट्टकृतेशूद्रस्यपुण्याहं॥ ॥
संवत १७९० वर्षेमार्गशीर्षमासेशुक्लपक्षे२सौमेतिथिलिखितंहरिगोविंदन॥ ॥